International Journal of Sanskrit Research 2019; 5(5): 90-91

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 90-91
© 2019 IJSR
www.anantaajournal.com
Received: 24-07-2019
Accepted: 28-08-2019

**रामानन्द मिश्र**
माता मनसा देवी संस्कृत गुरुकुल लक्ष्मी भवन धर्मशाला पंचकुला हरियाणा, भारत।

**Correspondence**
**रामानन्द मिश्र**
माता मनसा देवी संस्कृत गुरुकुल लक्ष्मी भवन धर्मशाला पंचकुला हरियाणा, भारत।

# संस्कृतसाहित्यशास्त्रे लोककल्याणस्य भावना

**रामानन्द मिश्र**

## प्रस्तावना

सर्वविश्वप्रसिद्धस्य सर्वराष्ट्रशिरोमणेः।
भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।।

संस्कृतसाहित्यशास्त्रे लोककल्याणस्य भावना विषयोऽयं स्वीकृतः मया। अस्मिन् शीर्षके संस्कृतं साहित्यं शास्त्रमिति शब्दत्रयं प्राप्यते। सम् उपसर्ग पूर्वकं कृ धातोः क्तप्रत्यययोजनेन निष्पन्नस्य संस्कृतशब्दस्यार्थः यत्किमपि सम्यक्प्रकारेण कृतमिति तत्। यदपि सुष्ठुः क्रियते तल्लोककल्याणकारकमेव भवतीति।
हितेन सह सहितः तस्य भावः साहित्यमिति। यस्मिन् चिन्तने हितस्य भावो भवति, यत् जनानां हितं चिन्तयति तल्लोककल्याणकारकमेव भवतीति। शिष्यते अनेनेति शास्त्रम्। अयं हि शब्दः शास् धातोः ष्ट्रन् प्रत्ययेन निष्पद्यते। यत् मनुष्यान् सम्यक् व्यवहारं शिक्षयति तत् शास्त्रमिति। शास्त्रं सदैव सम्माननीयं भवति। शास्त्रवचनं सर्वथा लोककल्याणकारकं भवति। अतः संस्कृतसाहित्यशास्त्रे लोककल्याणविरूद्धं किमपि नास्ति। अस्माभिः भारतस्य द्वे प्रतिष्ठे संस्कृतं संस्कृतिश्च स्वीक्रियेते। संस्कृतेनैव भारतीयसंस्कृतिः जगत्प्रसिद्धा, वन्दनीया पूजनीया च। संम्पूर्णसंस्कृतसाहित्यं लोककल्याणभावनया परिपूर्णमस्ति।
निखिलेऽस्मिन् विश्वसाहित्यरत्नाकरे वेदाः एव सृष्ट्युपलब्धाखिलज्ञानराशेः मूलाधाराः। वेदेषु सकलज्ञानविज्ञाननीतिव्यवहाराणां समुल्लेखो भवति। संस्कृतसाहित्यस्य आदिरशमयः वेदाः सर्वदा मंगलभावनान्विताः द्वेषशून्याश्चेति।
"जीवेम शरदः शतम्। पश्येम शरदः शतम्" [2] इति कामना कृता ऋषिभिः क्रियते चास्माभिः।
वैदिकसूक्तिषु प्रतिपदं सौहार्दभावः, लोककल्याणस्य भावना च दृश्यते। कथं मानवैः समाजे व्यवहर्त्तव्यमित्यस्मिन्नपि विषये यजुर्वेदस्योक्तिः–

"मित्रस्य चक्षुषा समीक्षामहे।" [3]

अर्थात् मनुष्यैः सर्वथा मित्रवदाचरणं कर्त्तव्यम्। अपि च

"न स सखा यो न ददाति सख्ये।" [4]

परस्परं मित्रभावं सूचयति मन्त्रोऽयम्। विश्वकल्याणमुद्घोषकाः अनेके मन्त्राः वेदेषु प्राप्यन्ते।

"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवाभागं यथापूर्वे संजानाना उपासते।।" [5]

संगठनरूपेण मिलित्वा सर्वाणि कार्याणि करणीयानि। समभावयुक्तं भूत्वा ज्ञानार्जनम् उपासना च करणीया। वैदिकप्रार्थना "आ नो भद्राः क्रतवो यन्तु" इति लोककल्याणभावनया परिपूर्णा वर्तते। लोककल्याणस्य मंगलभावनायाः सर्वश्रेष्ठमुदाहरणमिदम्। कियच्छुन्दरं परिवारस्य समाजस्य वा वातावरणमुक्तं मन्त्रेऽस्मिन्। यदि एतादृशी भावना सर्वत्र भवेत्तदा सर्वाः समस्याः नाशमाप्नुयुः। तद्यथा–

"मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्च सव्रता भूता वाचं वदत भद्रया।।" [6]

भद्रवाणी सर्वेषां मानसं प्रह्लादयति। कथं व्यवहर्त्तव्यम् इत्यस्मिन् सन्दर्भे नीतिशतकस्य पद्यमिदम् उल्लेखनीयमस्ति।

"दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने,
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम्।
शौर्यं शत्रुजने क्षमा गुरूजने नारीजनेऽधृष्टता,
ये चैव पुरूषाः कलासु कुशलास्तेष्वेव लोकस्थितिः।।" [7]

एतेषां गुणानामाधारेणैव संसारस्य स्थिति र्भवति। विश्वकल्याणस्याद्वितीयसन्देशोऽत्र प्राप्यते। वेदानां प्रत्येकऋचा मंगलं सूचयति। मानवस्य व्यक्तिगतं, सामाजिकं, मानसिकम्, आध्यात्मिकं च विकासः मंगलं च भवेदिति कामना वैदिकसूक्तेषु क्रियते। यथा–

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमती वाचं वदतु शान्तिवाम्।। [8]

अपि च –

समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति।। [9]

सर्वत्र समानतायाः भावप्रदर्शकः ऋग्वेदस्य मन्त्रोऽयं यथा–

समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।। [10]

समभावेन, संगठनेन परस्परसहयोगेन चैव लोककल्याणं सम्भवति। एवं वेदाः लोककल्याणं प्रति प्रेरयन्ति। न केवलं वैदिकसाहित्ये अपितु लौकिकसाहित्येऽपि प्रतिपदं लोककल्याणभावं संदृश्यते। लौकिकसंस्कृतसाहित्यस्य प्रथमकाव्यं महर्षिवाल्मीकिविरचितं रामायणम्। महाकाव्येऽस्मिन् विविधपात्राणां जीवनादर्शाः अस्मत्समक्षे प्रस्तुताः, ये लोककल्याणाय परोपकाराय च स्वजीवने अनेकशः योगदानं दत्तवन्तः। स्वार्थभावस्य त्यागः एवास्य प्रथमसंदेशः। यत्र स्वार्थभावस्य त्यागो भवति तत्र लोककल्याणं नूनमेव। महाकविकालिदासविरचिते रघुवंशे राज्ञः दिलीपस्य वर्णनप्रसंगे तस्य आदर्शनृपगुणानां प्राप्यते वर्णनम्। यथा भानुः धरणीरसं सहस्रगुणं कृत्वा प्रत्यर्पयति तथैव प्रजापालकः सः राजा दिलीपः प्रजानामेव समृद्धये ताभ्यः करं स्वीकरोति। तद्यथा–

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्सृष्टमादत्ते हि रसं रविः।। [11]

अयं हि गुणः लोककल्याणभावनायाः पोषकः। अस्मिन्नेव रघुवंशे समुद्भूतस्य श्रीरामस्य लोककल्याणस्य भावनायाः विषये तु किं कथनम्। तस्य तु सम्पूर्णजीवनमेव लोकाराधनाय। सः लोकानां प्रसन्नतायै स्वप्राणप्रियां सीतामपि त्यक्तुं सिद्धः। उत्तररामचरिते वर्णयति यथा भवभूतिः–

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।। [12]

संस्कृतसाहित्यस्य कल्याणकारीभावनायाः चर्मोत्कर्षस्तु अनेन विज्ञातुं शक्यते यत् अस्मिन् प्रकृतिरपि प्राणस्वरूपा मन्यते। प्रकृतेः कल्याणचिन्तनमपि संस्कृतसाहित्यस्य विशिष्टता। पशुपक्षिवृक्षलतापल्लवादीनां वर्णनप्रसंगे एतान् प्रति नायकनायिकानाम् अन्यपात्राणां च प्रेमभावं बहुशः दृश्यते। एतस्य सर्वश्रेष्ठमुदाहरणमस्ति महाकविकालिदासविरचितं विश्वप्रसिद्धनाटकम् अभिज्ञानशाकुन्तलमिति। शकुन्तलायाः प्रकृतिप्रेममाध्यमेन महाकविः समाजाय अपूर्वः सन्देशं ददाति। कथम् आश्रममृगाः स्वच्छन्दतया वने विचरन्ति स्म? प्रथमे अंके यदा राजा मृगमनुगच्छति तदा मृगस्य रक्षायै तापसः बाणपथि आगतः। तदा वैखानसस्योक्तिः–

"राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।" [13]

शकुन्तला अपि प्रकृतिसेवां स्वप्रथमधर्मं स्वीकरोति। चतुर्थे अंके 'पातुं नः प्रथमं व्यवस्यति जलमिति' [14] श्लोकेन महाकविकालिदासः संकेतयति यत् न केवलं मानवान् प्रति अपितु प्रकृतिं प्रत्यपि जनाः मंगलभावान्विताः आसन्। प्रकृतिरपि अस्मभ्यं सर्वं प्रत्यर्पयति। यथा शकुन्तलायाः पतिगृहगमनवेलायां विविधोपहारैः शकुन्तलामुपकुर्वन्ति वनस्पतयः। तद्यथा–

"क्षौमं केनचिदिन्दुपाण्डु तरूणा मांगल्माविष्कृतं
निष्ठ्यूतश्चरणोपभोगुलभो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।।" [15]

इत्यादिभिः अनेकोदाहरणैः सन्देशोऽयं प्राप्यते यत् संस्कृतसाहित्यस्य दृष्टिः सदैव लोकमंगलकारिणी। संस्कृतसाहित्यं लोककल्याणभावनया ओतप्रोतं वर्तते। एतस्य एकमेव कारणमस्ति श्रेष्ठा भारतीयसंस्कृतिः। नूनं हि भारतीयसंस्कृतिः विश्वबन्धुत्वपोषिका पारस्परिकसौहार्दोत्पादिका चास्ति। कुत्रापि भेदभावो न दृश्यते। परं कष्टेनानुभूयते यत् सम्प्रति भारतीयसंस्कृतेः इयं विशिष्टता क्षीणतामेति। पाश्चात्यसभ्यताशीभूताः सर्वे वयं स्वसंस्कृतिसौहार्दसंस्काराणाम चापि त्यागं कृतवन्तः। जनानां मनस्सु द्वेषभावना समुत्पन्ना। एतस्मादेव कारणाद् भ्रष्टाचारातंकवादप्रभृतयः नैकाः समस्याः विश्वेऽस्मिन् प्रसृताः।
एतासां सर्वासामेव समस्यानाम् एकमेव कारणं यत् वयं विशुद्धां, पुनीतां विश्वबन्धुत्वपोषिकां, लोककल्याणयुक्तां भारतीयसंस्कृतिं संस्काराणां च विस्मृतवन्तः। सा विश्ववारा संस्कृतिः पुनरागन्तुं शक्नोति यदि वयं स्वसंस्कारान् पुनरंगीकुर्मः। केन सह कथं व्यवहर्त्तव्यम्? का जीवनपद्धतिः? किं लोककल्याणम्? इति सर्वं विज्ञाय पुनः विचारः करणीयः। तदा एव "यत्र विश्वं भवत्येकनीडम्", "वसुधैव कुटुम्बकम्", "सर्वे भवन्तु सुखिनः" इत्यादयः वैदिकप्रार्थनाः सफलाः भविष्यन्तीति मेऽभिप्रायः।

ओ३म् सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै।। [16]
ओ३म् शान्तिश्शान्तिश्शान्तिः।

**सन्दर्भ**


1. शोधच्छात्रः,संस्कृतविभागः, पंजाबविश्वविद्यालयः,चण्डीगढम्।
2. यजुर्वेदः 36/24
3. तदेव
4. तदेव 10/117/4
5. ऋग्वेदः 10/191/2
6. अथर्ववेदः 3/30/3
7. नीतिशतकम् 18
8. अथर्ववेदः 3/30/2
9. ऋग्वेदः 10/191/4
10. तदेव 10/191/3
11. रघुवंशम् 1/18
12. उत्तररामचरितम् 1/12
13. अभिज्ञानशाकुन्तलम् अंकः 1 पृष्ठः 33
14. तदेव 4/8
15. तदेव 4/4
16. कठोपनिषद् 2/33/19